# Sample Paper
# &
# Question Paper Pattern

2022
**2023**

# GOA BOARD

aglasem.com

# MODEL QUESTION PAPER FOR FIRST TERMINAL EXAM 2022-2023

SUB – SANSKRIT | LANGUAGE -III

MARKS – 40 | DURATION 1½ hrs

========================================================================

**सूचनाः-**१)प्रश्नपत्रे ३ खण्डाः सन्ति |

२)आहत्य ४० प्रश्नाः सन्ति |

३)सर्वे प्रश्नाः अनिवार्याः | प्रत्येकं प्रश्नस्य १ गुणः |

४) प्रत्येकं प्रश्नस्य सूचनानुसारं चतुर्भ्यः प्रदत्त सम्भावनियोत्तरेभ्यः योग्यं उत्तरं चित्वा लेखनीयम् |

५)प्रश्नक्रमाङ्कः , चितस्य उत्तरस्य क्रमाङ्कः उत्तरं च स्पष्टतया लेखनीयम् |

===================================================================

**(प्रथमखण्डः – पठितावबोधनम्-१६ गुणाङ्काः)**

अधोलिखितं परिच्छेदं पठित्वा प्रश्नानां समुचितानि उत्तराणि चिनुत | (प्र.१ तः ५ पर्यन्तम्)

अरबीसागरपर्यन्तं सप्तसप्ततिः(७७) कि.मि.पर्यन्तं मम विस्तारः| सह्याद्रेः अधित्यकातः अहम् अधः वहामि | प्रारम्भे मम प्रवाहे मधुरं जलं विद्यते | तज्जलं जनानां कृते पेयं स्नानयोग्यं चास्ति | मम जलेन कृषीवलाः क्षेत्राणि सिञ्चन्ति | येन जीवानां कृते बहुधानस्य फलपुष्प-मूलानाञ्च प्राप्तिः भवति |तेन सर्वत्र सुभिक्षं भवति |किन्तु यदाहं सागरान्तिकं प्राप्नोमि, तदा शनैः शनैः मम जलं क्षारं भवति | मम क्षारं जलमपि जनानाम् उपयुक्तमेव,यतः तस्मात् जनाः लवणं लभन्ते |सागरनिकटप्रदेशे मम वामतटे लवणनिर्मितिक्षेत्राणि दृश्यन्ते| सागरसङ्गमात् पूर्वं मम जुवारी-नद्या सह मेलनं भवति |ततः अहं सागरे एकरूपतां यामि| सिकताव्यवसायः अपि मम तट्योः चलति |तेन च नैकेषां जनानां उदरनिर्वाहः भवति |

अ)एकपदेन उत्तरत |

१) क्षारजलेन जनाः किं लभन्ते ?

अ) सिकता

आ)धनम्

इ)लवणम्

ई)दुग्धम्

२)अरबीसागरपर्यन्तं माण्डव्याः कति कि.मि. पर्यन्तं विस्तारः ?

अ) सप्ततिः

आ)सप्तसप्ततिः

इ) पञ्चाशत्

ई) अष्टोत्तरशतम्

docs.aglasem.com



aglasem.com

आ) एकवाक्येन उत्तरत |

३)तट्योः कः व्यवसायः चलति ?

अ) तट्योः सिकताव्यवसायः चलति |

आ)तट्योः दुग्धव्यवसायः चलति |

इ) तट्योः खनिजव्यवसायः चलति |

ई)तट्योः जलव्यवसायः चलति |

४)प्रारम्भे माण्डव्याः जलं कथं विद्यते ?

अ) प्रारम्भे माण्डव्याः जलं शीतं विद्यते |

आ)प्रारम्भे माण्डव्याः जलं उष्णं विद्यते |

इ) प्रारम्भे माण्डव्याः जलं मधुरं विद्यते |

ई) प्रारम्भे माण्डव्याः जलं तिक्तं विद्यते |

५) माण्डव्याः जुवारीनद्या सह कदा मेलनं भवति ?

अ) माण्डव्याः जुवारीनद्या सह मेलनं सागरसङ्गमात्पूर्वं भवति |

आ)माण्डव्याः जुवारीनद्या सह मेलनं सूर्योदयात्पूर्वं भवति |

इ) माण्डव्याः जुवारीनद्या सह मेलनं कार्यक्रमात्पूर्वं भवति |

ई) माण्डव्याः जुवारीनद्या सह मेलनं नाटकात्पूर्वं भवति |

पद्यखण्डं पठित्वा प्रश्नानां समुचितानि उत्तराणि चिनुत | (प्र.६ तः ८ पर्यन्तम् )

शतेषु जायते शूरः सहस्रेषु च पण्डितः |
वक्ता दशसहस्रेषु दाता भवति न वा ||
कुसुमं वर्णसम्पन्नं गन्धहीनं न शोभते |
न शोभते क्रियाहीनं मधुरं वचनं तथा ||

६)कीदृशं वचनं न शोभते ?

अ) वर्णसम्पन्नं वचनं न शोभते |

आ)क्रियाहीनं वचनं न शोभते |

इ) क्रियाहीनं मधुरं च वचनं न शोभते |

ई) क्रियायुक्तं वचनं न शोभते |

७)पण्डितः केषु जायते ?

अ) पण्डितः शतेषु जायते |

आ)पण्डितः दशसहस्रेषु जायते |

इ) पण्डितः सहस्रेषु जायते |

ई) पण्डितः पञ्च जायते |

docs.aglasem.com



aglasem.com

८)दशसहस्रेषु कः जायते ?

अ) दशसहस्रेषु वक्ता जायते |

आ)दशसहस्रेषु देवः जायते |

इ) दशसहस्रेषु शूरः जायते |

ई) दशसहस्रेषु माधवः जायते |

उचितसुभाषितांशं चित्वा लिखत | (प्र.९ तः १० पर्यन्तम् )

९)सजीवं दहते चिन्ता --------------------------------|

अ) यमराजसहोदर |

आ)हा हा केशव केशव |

इ) निर्जीवं दहते चिता |

ई) अस्पृशन्नेव वित्तानि

१०)विंशतिः पुनरायाता --------------------------------|

अ) सा स्त्री देहविवर्जिता |

आ)एको व्याघ्रेण भक्षितः |

इ) बिन्दुमात्रविशेषतः |

ई) न भूतो न भविष्यति |

उचितम् उत्तरं चित्वा लिखत |(प्र.११ तः १४ पर्यन्तम् )

११) किमपि कार्यं कथं न कर्तव्यम् ?

अ) किमपि कार्यं अविचार्य न कर्तव्यम् |

आ)किमपि कार्यं सुविचार्य न कर्तव्यम् |

इ) किमपि कार्यं आलस्येन न कर्तव्यम् |

ई) किमपि कार्यं न कर्तव्यम् |

१२)पर्वतशिखरं गन्तुं कति मार्गाः सन्ति ?

अ) पर्वतशिखरं गन्तुं विंशतिः मार्गाः सन्ति |

आ)पर्वतशिखरं गन्तुं पञ्च मार्गाः सन्ति |

इ) पर्वतशिखरं गन्तुं दश मार्गाः सन्ति |

ई) पर्वतशिखरं गन्तुं द्वौ मार्गौ स्तः |

docs.aglasem.com



aglasem.com

१३) अशोकचक्रं कस्य द्योतकम् अस्ति ?

अ) अशोकचक्रं सत्यस्य, धर्मस्य अहिंसायाश्च द्योतकम् अस्ति |

आ) अशोकचक्रं समृद्धेः द्योतकम् अस्ति |

इ) अशोकचक्रं शौर्यस्य द्योतकम् अस्ति |

ई) अशोकचक्रं अभ्यासस्य द्योतकम् अस्ति |

१४)सङ्गीतोपासकाः अखण्डतया किं कुर्वन्ति स्म ?

अ) सङ्गीतोपासकाः अखण्डतया नृत्यं कुर्वन्ति स्म |

आ)सङ्गीतोपासकाः अखण्डतया सङ्गीतसाधनया शिवाराधनां कुर्वन्ति स्म |

इ) सङ्गीतोपासकाः अखण्डतया पूजनं कुर्वन्ति स्म |

ई) सङ्गीतोपासकाः अखण्डतया भाषणं कुर्वन्ति स्म |

वाक्यानि कः कं प्रति वदति इति लिखत | (प्र.१५ तः १६ पर्यन्तम् )

१५) " किम् एतासां पट्टिकानां अन्यदपि महत्वम् ?"

अ) एतत् वाक्यं शुचिः तेजिन्दरं प्रति वदति |

आ)एतत् वाक्यं देवेशः शुचिं प्रति वदति |

इ) एतत् वाक्यं तेजिन्दरः देवेशं प्रति वदति |

ई) एतत् वाक्यं शुचिः डेविडं प्रति वदति |

१६) "मासान्तेऽहं धनी भविष्यामि |"

अ) एतत् वाक्यं मालती नन्दिनीं प्रति वदति |

आ)एतत् वाक्यं नन्दिनी मालतीं प्रति वदति |

इ) एतत् वाक्यं माधवः मालतीं प्रति वदति |

ई) एतत् वाक्यं माधवः भागिनेयं प्रति वदति |

**(द्वितीयखण्डः – अपठितावबोधनम्- ०६ गुणाङ्काः)**

परिच्छेदं पठित्वा अधः प्रदत्तानां प्रश्नानाम् समुचितानि उत्तराणि लिखत | (प्र.१७ तः १९ पर्यन्तम् )

कविकुलशिरोमणिः महाकविकालिदासः नृपतेः विक्रमादित्यस्य सभायां विद्यमानेषु नवरत्नेषु एकतमः आसीत् |सः पूर्वजीवने कालिमातुः भक्तः आसीत् |तस्याः प्रसादेन सः महाकविः अभवत् |ततः तेन महती साहित्यनिर्मितिः कृता |तेन कुमारसम्भवम् रघुवंशम् च इति द्वे महाकाव्ये, ऋतुसंहार-मेघदूते इति द्वे खण्डकाव्ये, मालविकाग्निमित्रम्, विक्रमोर्वशीयम्,
अभिज्ञानशाकुन्तलम् च इति त्रीणि नाटकानि विरचितानि |तस्य शाकुन्तलम् पठित्वा गटेनामा जर्मन् कविः तद् नाटकं मस्तके धृत्वा सानन्दम् अनृत्यत् |सः उपमा अलङ्काररचनायां निपुणः आसीत् |अतः उपमा कालिदासस्य इति उक्तिः प्रचलिता अभवत् |

docs.aglasem.com



aglasem.com

एकपदेन उत्तरत |

१७)कालिदासेन कति नाटकानि विरचितानि ?

अ) षड्

आ)त्रीणि

इ)पञ्च

ई)एकम्

एकवाक्येन उत्तरत |

१८) कालिदासः पूर्वजीवने कस्याः भक्ताः आसीत् ?

अ) कालिदासः पूर्वजीवने शारदायाः भक्तः आसीत् |

आ)कालिदासः पूर्वजीवने कालिमातुः भक्तः आसीत् |

इ) कालिदासः पूर्वजीवने लक्ष्म्याः भक्तः आसीत् |

ई) कालिदासः पूर्वजीवने नद्याः भक्तः आसीत्

१९)शाकुन्तलनाटकं पठित्वा कः आनन्देन अनृत्यत् ?

अ) शाकुन्तलनाटकं पठित्वा कालिदासः आनन्देन अनृत्यत् |

आ)शाकुन्तलनाटकं पठित्वा भक्तः आनन्देन अनृत्यत् |

इ) शाकुन्तलनाटकं पठित्वा गटेनामा जर्मन् कविः आनन्देन अनृत्यत् |

ई) शाकुन्तलनाटकं पठित्वा राजा आनन्देन अनृत्यत्

पद्यखण्डस्य आधारेण अधः प्रदत्तप्रश्नानां समुचितानि उत्तराणि चित्वा लिखत |(प्र.२० तः २२पर्यन्तम् )

दुर्जनेन समं सख्यं प्रीतिं चापि न कारयेत् |
उष्णो दहति चाङ्गारः शीतः कृष्णायते करम् ||

गौरवं प्राप्यते दानात् न तु वित्तस्य सञ्चयात् |
स्थितिरुच्चैः पयोदानां पयोधीनामधस्थितिः |

एकपदेन उत्तरत |

२०)पयोदानां स्थितिः कुत्र भवति ?

अ) उच्चैः

आ)मध्ये

इ)अधः

ई)समीपे

२१)शीतः अङ्गारः किं कृष्णायते ?

अ) मुखम्

आ)करम्

इ) वित्तम्

ई) पत्रम्



docs.aglasem.com
aglasem.com

एकवाक्येन उत्तरत |

२२)गौरवं कस्मात् प्राप्यते ?

अ)गौरवं कार्यात् प्राप्यते |

आ) गौरवं सञ्चयात् प्राप्यते |

इ) गौरवं पूजनात् प्राप्यते |

ई) गौरवं दानात् प्राप्यते |

**(तृतीयखण्डः – व्याकरणम्- १८ गुणाङ्काः)**

अधोलिखितवाक्येषु रिक्तस्थानानि पूरयितुं योग्यं पदं चिनुत |(प्र.२३ तः २५ पर्यन्तम् )

२३)माधवस्य गृहे------------- नाम्नी एका गौः आसीत् |

अ) नन्दिन्याः

आ)नन्दिनी

इ) नन्दिन्या

ई) नन्दिनीम्

२४)लक्षाधिकाः जनाः स्वान्------------- अत्यजन् |

अ) प्राणाः

आ)प्राणानाम्

इ) प्राणान्

ई)प्राणेषु

२५)------------- परितः मूर्तयः सन्ति |

अ)चन्द्रेश्वरं

आ) चन्द्रेश्वराय

इ)चन्द्रेश्वरस्य

ई)चन्द्रेश्वरेण

उचितं पर्यायपदं चिनुत|(प्र.२६ तः २८ पर्यन्तम् )

२६)मत्स्यः

अ) मीनः

आ) यागः

इ) पर्वतः

ई) नदी

docs.aglasem.com



aglasem.com

२७) अनलः

अ) वायुः

आ)मन्दिरम्

इ) अग्निः

ई) सूर्यः

२८) वित्तम्

अ) राजा

आ)धनम्

इ) शरीरम्

ई) विमानम्

उचितं विलोमपदं चिनुत |(प्र.२९ तः ३१ पर्यन्तम् )

२९)प्रमुखः

अ) अन्ते

आ) विख्यातः

इ) उपरि

ई) गौणः

३०) मूलम्

अ) अग्रे

आ)रात्रिः

इ) शिखरम्

ई) पुरतः

३१) शत्रुः

अ) मित्रम्

आ)भ्राता

इ) मित्रः

ई) दुष्टः

उचितं सन्धिविग्रहं चिनुत |(प्र.३२ तः ३३ पर्यन्तम् )

३२) हरितश्च

अ) हरित + च

आ) हरितश् + च

इ) हरितः + च

ई) हरिता + च

docs.aglasem.com



aglasem.com

३३)कृत्वैव

अ) कृत्वा + एव

आ)कृत्व + एव

इ) कृत्वा + ऐव

ई) कृत्वः + एव

उचितं तुम् प्रत्ययान्तम् अव्ययं चिनुत | (प्र.३४ तः ३५ पर्यन्तम् )

३४) गम् - गच्छ्

अ) गमितुम्

आ)गन्तुम्

इ)गामितुम्

ई) आगन्तुम्

३५) ताड्

अ) तडितुम्

आ) ताडितुम्

इ)ताडयितुम्

ई) ताडैतुम्

३६) 'कष्टकरः ' इत्यत्र कः समासः |

अ) कर्मधारयः

आ) उपपदतत्पुरुषः

इ) द्वन्द्वः

ई) अव्ययीभावः

३७)'स्वार्थपराः' अस्स्यः विग्रहः कः ?

अ) स्वार्थस्य पराः

आ) स्वार्थात् पराः

इ) स्वार्थे पराः

ई) स्वार्थः पराः

३८) ' अग्नेः शिखा ' अत्र समस्तपदं किम् ?

अ)अग्निशिखा

आ)अग्निःशिखा

इ)अग्नेशिखा

ई) अग्नशिखा

docs.aglasem.com



aglasem.com

अधोरेखितपदस्य कृते उचितं प्रश्नवाचकं पदं चिनुत |

३९)<u>गोमन्तके</u> खनिजव्यवसायः प्रचलति |

अ) कति

आ)कुत्र

इ) कदा

ई) कीदृशः

४०) पर्वतस्य मूलभागे मूळस इति <u>स्थानम्</u> अस्ति |

अ) कः

आ) कस्य

इ)किमर्थम्

ई) किम्

**==========================समाप्तम्==========================**

docs.aglasem.com



aglasem.com

# MODEL ANSWER KEY FOR FIRST TERMINAL EXAM 2022-2023

SUB – SANSKRIT LANGUAGE -III

MARKS – 40 DURATION 1½ hrs

===================================================================१)

इ)लवणम्

२) आ)सप्तसप्ततिः

३) अ)तट्योः सिकताव्यवसायः चलति |

४) इ)प्रारम्भे माण्डव्याः जलं मधुरं विद्यते |

५) अ)माण्डव्याः जुवारीनद्या सह मेलनं सागरसङ्गमात्पूर्वं भवति |

६) इ) क्रियाहीनं मधुरं च वचनं न शोभते |

७) इ)पण्डितः सहस्रेषु जायते |

८) अ)दशसहस्रेषु वक्ता जायते |

९) इ) निर्जीवं दहते चिता |

१०) आ)एको व्याघ्रेण भक्षितः |

११) अ)किमपि कार्यं अविचार्य न कर्तव्यम् |

१२) ई)पर्वतशिखरं गन्तुं द्वौ मार्गौ स्तः |

१३) अ) अशोकचक्रं सत्यस्य, धर्मस्य अहिंसायाश्च द्योतकम् अस्ति |

१४) आ) सङ्गीतोपासकाः अखण्डतया सङ्गीतसाधनया शिवाराधनां कुर्वन्ति स्म |

१५) ई) एतत् वाक्यं शुचिः डेविडं प्रति वदति |

१६) इ) एतत् वाक्यं माधवः मालतीं प्रति वदति |

१७) आ)त्रीणि

१८) आ)कालिदासः पूर्वजीवने कालिमातुः भक्तः आसीत् |

१९) इ)शाकुन्तलनाटकं पठित्वा गटेनामा जर्मन् कविः आनन्देन अनृत्यत् |

२०) अ) उच्चैः

२१) आ)करम्

२२) ई) गौरवं दानात् प्राप्यते |

२३) आ) नन्दिनी

२४) इ) प्राणान्

२५) अ)चन्द्रेश्वरं

२६) अ) मीनः

२७) इ) अग्निः

२८) आ)धनम्

२९) ई) गौणः

३०) इ) शिखरम्

३१) अ)मित्रम्

३२) इ) हरितः + च

३३) अ)कृत्वा + एव

३४) आ)गन्तुम्

docs.aglasem.com



aglasem.com

३५) इ)ताडयितुम्

३६) आ)उपपदतत्पुरुषः

३७) इ)स्वार्थे पराः

३८) अ)अग्निशिखा

३९) आ)कुत्र

४०) ई) किम्

==========================================================

docs.aglasem.com



aglasem.com

# MODEL QUESTION PAPER FOR SECOND TERMINAL EXAM 2022-2023

SUB – SANSKRIT LANGUAGE -III

MARKS – 40 DURATION - 1½ hrs

===========================================================

सूचनाः१)सर्वेषां प्रश्नानाम् उत्तराणि नवीने पृष्ठे लेखनीयानि |

२)प्रश्नानां क्रमाङ्काः तथा उपप्रश्नानाम् अक्षराणि स्पष्टतया लेखनीयानि |

३)सर्वे प्रश्नाः अनिवार्याः सन्ति |

४)दक्षिणभागे दर्शिताङ्काः गुणाङ्काः सन्ति |

५)सम्पूर्णे उत्तरपत्रे एकस्याः एव स्वभाषायाः उपयोगः करणीयः |

६)स्वभाषा नाम हिन्दी, मराठी, कोंकणी, आङ्ग्लभाषा वा |

===========================================================

**(प्रथमखण्डः – पठितावबोधनम् – १६ गुणाङ्काः)**

प्र.१.क)अधस्तनं गद्यखण्डं पठित्वा प्रदत्तान् प्रश्नान् सूचनानुसारेण संस्कृतभाषया उत्तरत | (३)

तच्छ्रुत्वा पाण्डववीराः कथमर्जुनः प्रतिज्ञासागरं यशस्वितया तरिष्यतीति विचिन्त्य उन्निद्रा आसन् | कौरववीरा अपि जयद्रथरक्षणे विचारमग्नाः नालभन्त निद्राम् |अर्जुनप्रतिज्ञां श्रुत्वा दुर्योधनेन जयद्रथाय रक्षणं प्रतिश्रुतम् | द्रोणाचार्योऽपि रक्षणार्थं प्रार्थितः | तेन शकटव्यूहो रचितः |एवं युद्धे प्रवर्तमाने सूर्यास्तसमयः आसन्नप्रायो जातः |

अ)एकवाक्येन उत्तरत |

१)अर्जुनप्रतिज्ञां श्रुत्वा दुर्योधनेन किं कृतम् ?

२) पाण्डवाः केन विचारेण उन्निद्रा आसन् ?

आ) नालभन्त - सन्धिविग्रहं कृत्वा लिखत |

ख)एकस्य गद्यखण्डस्य अनुवादं स्वभाषया लिखत | (२)

अ)बान्दोडकरमहाभागस्य पूर्णनामधेयं श्रीमान् दयानन्द बालकृष्ण बान्दोडकरः विद्यते | सः गोवाप्रान्तस्य जनैः सह वात्सल्येन सौहार्देन च व्यवहरति स्म| सःस्वभावेन अतीव सरलः दयालुः च अवर्तत| जनानां हितकार्यसम्पादनाय सः सततमग्रजवत् यतते स्म |

आ) छात्राः – अयि ज्येष्ठाः ! भवत्सकाशात् वयं गोमन्तकस्य लोकजीवनविषये ज्ञातुम् समुत्सुकाः| कृपया अस्मान् सविस्तरं कथयन्तु भवन्तः |

सञ्जयः – गोमन्तकस्य लोकजीवनं समृद्धं निसर्गानुरूपं च विद्यते |गोमन्तकीयाः जनाः निसर्गप्रियाः खलु |

ग)एकस्य प्रश्नस्य उत्तरं स्वभाषया लिखत | (२)

अ) धोण्ड इति नाम्ना प्रसिद्धाः जनाः व्रतम् कथम् आचरन्ति ?

आ) वञ्चकः कर्पूरतिलकसमीपं गत्वा किंम उवाच ?

docs.aglasem.com



aglasem.com

प्र.२.च)एकस्य सुभाषितस्य अनुवादं स्वभाषया लिखत | (२)

अ) विद्या विवादाय धनं मदाय शक्तिः परेषां परिपीडनाय |
खलस्य साधोर्विपरीतमेतद् ज्ञानाय दानाय च रक्षणाय ||

आ)नष्टं द्रव्यं लभ्यते कष्टसाध्यं नष्टा विद्या लभ्यतेऽभ्यासयुक्ता |
नष्टारोग्यं सूपचारैः सुसाध्यं नष्टा वेला या गता सा गतैव ||

छ)एकं सुभाषितं पूर्णं शुद्धं च लिखत | (२)

अ)न सदा----------------------|-----------------------||

आ)वाचनं-----------------------|-----------------------||

प्र.३.ट)अधोलिखितानां प्रश्नानाम् उत्तराणि एकवाक्येन संस्कृतभाषया उत्तरत |(द्वयोः) (२)

अ) बान्दोडकरमहोदयः छात्राणां कृते किम् अकरोत् |

आ) डिचोलीभागः कस्मिन् कलायां प्रसिद्धः ?

इ) अन्धकारं निराकृत्य श्रीकृष्णः अर्जुनं किम् अवदत् ?

ठ)अधस्तनवाक्यं कः कं प्रति अवदत् तत् लिखत | ( एकम्) (१)

अ) “अत्र अनेकानां कलानां परिपोषणं जायते |”

आ) “किमधुना कर्तव्यम् महापङ्के पतितोऽहं म्रिये |”

ड)वाक्यांशयोः मेलनं कृत्वा लिखत | (२)

| **अ स्तम्भः** | | **आ स्तम्भः** |
|---|---|---|
| १)पेडणेभागः | - | अ)न तत्छक्यं पराक्रमैः \| |
| २)उपायेन हि यत्च्छक्यं | - | आ) गृहनिर्माण कलायां ख्यात: । |
| | - | इ) कालो हि दुरतिक्रमः \| |

**(द्वितीयखण्डः – अपठितावबोधनम् – ०६ गुणाङ्काः)**

प्र.४.त)अधस्तनं गद्यखण्डं पठित्वा प्रदत्तान् प्रश्नान् सूचनानुसारेण <u>संस्कृतभाषया</u> उत्तरत | (३)

भारतमाता अस्माकं जननीरूपा वर्तते | जननी जन्मभूमिश्च स्वर्गादपि गरीयसी | जननी जन्मनः प्रभृति अतीव स्नेहेन पालयति, आजीवनं सन्ततेः सुखाय कष्टानि सहते | जन्मभूमिः अपि अस्मभ्यं नाविधानि अन्नानि फलानि च दत्वा पालयति| यथा जनाः मातरं प्रणम्य तस्याः सेवां कृत्वा च सुखम् अनुभवन्ति तथैव मातृभूमेः अपि सेवा करणीया | तेन वयं सुखेन जीवितुं शक्नुमः |

अ)एकवाक्येन उत्तरत |

१)जनाः कथम् सुखम् अनुभवन्ति ?

२) जननी अस्मभ्यं किं दत्वा पालयति ?

आ)जननी स्नेहेन पालयति | वाक्यं लङ्लकारे परिवर्तयत |

docs.aglasem.com



aglasem.com

थ)अधोलिखितयोः परिच्छेदयोः एकस्य अनुवादं स्वभाषया लिखत| (३)

अ) वृक्षाः लताः च न केवलं मानवानाम् अपि तु अन्यप्राणिनाम् उपकारकाणि मित्राणि | पादपाः स्वयम् आतपे तिष्ठन्ति,परेषाम् तापम् च हरन्ति | केचन वृक्षाः उत्तुङ्गाः ,केचन वामनाः | विविधाः तरवः नैकविधानि गृहोपकारकाणि वस्तूनि प्रयच्छन्ति | अधुना सार्थपराः जनाः वृक्षान् अर्थार्जनाय कर्तयन्ति |

आ)प्रभाकरः – नमो नमः | आदित्य ! त्वम् अत्र किमर्थम् आगतवान् ?

आदित्यः – नमो नमः | मम अग्रजायाः विवाहः अस्ति ,तस्य आमन्त्रणं दातुं आगतवान् अहम् |

प्रभाकरः – उत्तमम् |अतीव आनन्दस्य वार्ता एषा | वयं सर्वे आगमिष्यामः |

आदित्यः – भोः! त्वम् मम गृहे स्थातुम् आगच्छतु |

प्रभाकरः – आम् | आगच्छामि |

**( तृतीयखण्डः – व्याकरणम् – १० गुणाङ्काः )**

प्र.५.प)अधोलिखितवाक्यानां रिक्तस्थानेषु उचितानि पदरूपाणि कोष्ठकात् चित्वा लिखत |(एकस्य्) (१)

अ)भक्ताः -------------- देवालयं गच्छन्ति | (श्रद्धासु, श्रद्धया, श्रद्धानाम् )

आ) जननी शिशुं-------------- रक्षति | ( सङ्कटस्य, सङ्कटाय, सङ्कटात् )

फ)संस्कृतपर्यायपदं लिखत | (२)

अ)बुद्धिः आ)पर्वतः

ब)सन्धिं कृत्वा लिखत |( एकम् ) (१)

अ)प्रभावात् + अस्य आ)प्रशान्तः + तदा

भ)क्त्वा प्रत्ययान्तम् अव्ययं लिखत | (१)

अ) दृश् आ)मिल्

प्र.६.य)तालिकायां रिक्यस्थानेषु समस्तपदम्/विग्रहम्/समासनाम वा लिखत | ( द्वयोः) (२)

| समस्तपदम् | विग्रहः | समासनाम् |
|---|---|---|
| अ)प्रतिस्थानम् | स्थाने स्थाने | -------------- |
| आ) -------------- | मासानां चतुष्टयम् | षष्ठीतत्पुरुषः |
| इ)पाण्डवकौरवाः | -------------- | इतरेतरद्वन्द्वः |

र)रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं कृत्वा वाक्यं पुनः लिखत |( द्वयोः ) (१)

अ)माता सायङ्काले <u>मन्दिरं</u> गमिष्यति |

आ) सा <u>कुलागराणां</u> सवर्धनं करोति |

docs.aglasem.com



aglasem.com

ल)सूचनानुसारं वाक्यपरिवर्तनं कृत्वा वाक्यं पुनः लिखत | (द्वयोः) (२)

अ)कार्यक्रमस्य आरम्भः ३.१५ वादने भविष्यति | (समयवाचिपदं लिखत )

आ) अहम् अग्निप्रवेशं करिष्यामि | ( वाक्यं लङ्लकारे परिवर्तयत )

इ) सः महापङ्कस्य बहिः गन्तुम् असमर्थः अभवत् | (वाक्यं शुद्धं कृत्वा लिखत )

ई) स्मारकं शोभते | (वाक्यं बहुवचने परिवर्तयत)

## ( चतुर्थखण्डः – रचना -०८ गुणाङ्काः )

प्र.७.व)कोष्ठकात् उचितपदानि चित्वा सार्थकवाक्यानि लिखत | (३)

| | | |
|---|---|---|
| अ)कमलानि | कन्दुकेन | अनुसरति | |
| आ)वयम् | सन्मार्गं | विकसन्ति | |
| इ)सज्जनः | श्लोकान् | क्रीडन्ति | |
| ई)बालाः | सरोवरे | पठामः | |

श)कोष्ठकात् उचितपदानि चित्वा संवादपूर्तिं कृत्वा संवादं पुनः लिखत | (३)

( सत्यं, पतितम्, स्यूते, आगच्छतु,धनम्, पतितः,धनस्यूतः )

अञ्जनी – सखि! पश्यतु भो !, तत्र किमपि-------अस्ति |

श्रेया – किं तत्र ?

अञ्जनी – पश्याम,-------------|

श्रेया – अहो -----------------|

अञ्जनी - एष: कस्य धनस्यूत: स्यात् ?

श्रेया - क: जानाति ?

अञ्जनी – ------------किम् अस्ति इति पश्यतु भोः!

श्रेया – हन्त! बहु ----------- अस्ति भोः ! पश्यतु |

अञ्जनी - ----------- | कति रूप्यकाणि सन्ति ?

docs.aglasem.com



aglasem.com

ष)एकं विषयं अधिकृत्य संस्कृतभाषया व्याकरणसुद्धानि चत्वारि वाक्यानि लिखत | (२)

अ)सुभाषितानि आ)कल्पवृक्षः इ)मम प्रियः नेता

**अथवा**

ष)चित्रम् आधृत्य कोष्ठकस्थपदानां साहाय्येन व्याकरणशुद्धानि चत्वारि वाक्यानि लिखत| (२)

(वालुकागृहम्, तरन्ति,जले,उत्साहेन,सूर्यास्तः )



==============================समाप्तम्========================



docs.aglasem.com

aglasem.com

# MODEL ANSWER KEY FOR SECOND TERMINAL EXAM 2022-2023

SUB – SANSKRIT LANGUAGE -III

MARKS – 40 DURATION - 1½ hrs

==========================================================================

**(प्रथमखण्डः – पठितावबोधनम् – १६ गुणाङ्काः)**

प्र. १ क) अधस्तनं गद्यखण्डं पठित्वा प्रदत्तान् प्रश्नान् सूचनानुसारेण संस्कृतभाषया उत्तरत | (३)

सूचनानुसारं पूर्णानि व्याकरणशुद्धानि च उत्तराणि आवश्यकानि ।

अपूर्णउत्तरस्य अर्धः गुणः न्यूनः करणीयः । प्रत्येकं एकः गुणः ।

अ)एकवाक्येन उत्तरत ।

१)अर्जुनप्रतिज्ञां श्रुत्वा दुर्योधनेन जयद्रथाय रक्षणं प्रतिश्रुतम् ।

२)कथम् अर्जुनः प्रतिज्ञासागरं यशस्वितया तरिष्यति इति विचिन्त्य पाण्डववीरा उन्निद्राः आसन् ।

आ) न + अलभन्त

ख) एकस्य गद्यखण्डस्य अनुवादं स्वभाषया लिखत । (२)

भाषाशुद्धता, सन्दर्भः, प्रत्येकं शब्दस्य अनुवादः, व्याकरणशुद्धता च एतेषां विषये चिन्तनं कृत्वा गुणाः देयाः । प्रत्येकी गुणद्वयम् ।

ग) एकस्य प्रश्नास्य उत्तरं स्वभाषया लिखत । (२)

स्वभाषया उत्तरं अपेक्षितम् । भाषाशुद्धता, व्याकरणशुद्धता च एतयोः विषये चिन्तनं कृत्वा गुणाः देयाः । प्रश्नानुसारं उत्तरम् आवश्यकम् । प्रत्येकं गुणद्वयम् ।

अ) शिरगावच्या वार्षिक जत्रोत्सवामध्ये होमकुण्डामधून चालत जाणे हा एक विधी प्रचलित आहे. त्यामध्ये भाग घेणा-या लोकांना धोंड असे म्हणतात. जत्रेपूर्वी ते एक महिनापर्यंत मांसाहार व अपेयवस्तु वगैरे पिणे सोडून सात्विक (शाकाहारी) आहार घेतात व आचरण शुद्ध ठेवतात.

आ) लबाड कोल्हा मी माझ्या बुद्धीच्या जोरावर हत्तीला मारेन अशी प्रतिज्ञा करून हत्तीजवळ जाऊन साष्टांग नमस्कार करून म्हणाला देवा,आपल्या दर्शनाचा मला लाभ द्यावा(मला दर्शन द्यावे). हत्तीने त्याची चौकशी करता कोल्हा सांगू लागला वनात राहणा-या सर्व पशूंनी मिळून मला आपल्यापाशी पाठविले आहे कारण राजा शिवाय राहणे योग्य नाही म्हणून या अरण्यात राज्याभिषेकासाठी सर्व राजगुणांनी आपण परिपूर्ण आहात .तेव्हा मुहूर्त निघून जाण्याअगोदर आपण राज्याभिषेकासाठी लवकर यावे असे सांगीतले.

प्र. २ च)एकस्य पद्यखण्डस्य अनुवादं स्वभाषया लिखत । (२)

भाषाशुद्धता, सन्दर्भः, प्रत्येकं शब्दस्य अनुवादः व्याकरणशुद्धता च एतेषां विषये चिन्तनं कृत्वा गुणाः देयाः । प्रत्येकं गुणद्वयम् ।

छ)एकं सुभाषितं पूर्णं शुद्धं च लिखत । (२)

सुभाषितस्य पूर्ण- शुद्धलेखनं च आवश्यकम् । पूर्णशुद्धसुभाषितस्य कृते गुणद्वयम् ।

docs.aglasem.com



aglasem.com

प्र. ३ ट) अधोलिखितानां प्रश्नानाम् उततराणि एकवाक्येन संस्कृतभाषया उत्तरत। (द्वयो:) (२)

द्वयो: प्रश्नयो: संस्कृतभाषायां उत्तरे अपेक्षिते स्त: । प्रत्येकं गुणद्वयम् ।

अ)बान्दोडकरमहोदय: छात्राणां कृते स्थाने स्थाने विद्यालयान् क्रीडाङ्गणानि च निर्मितवान् ।

आ)डिचोलीभाग: मृद्-धातु- वस्तु- निर्माणकलायां विख्यात: ।

इ) अन्धकारं निराकृत्य श्रीकृष्ण: अर्जुनं अवदत् रे अर्जुन! अयं सूर्य: अयं च जयद्रथ: । अधुना मुञ्च बाणम् ।

ठ) अधस्तनवाक्यं क: कं प्रति अवदत् तत् लिखत । (एकस्य) (१)

एकस्य प्रश्नस्य उत्तरं संस्कृतभाषया अपेक्षितम् । प्रत्येकं एक: गुण: ।

अ)एतत् वाक्यं ज्ञानेश: छात्रान् प्रति अवदत् ।

आ)एतत् वाक्यं कर्पूरतिलक: वृद्धशृगालं प्रति अवदत् ।

ड) वाक्यांशयो: मेलनं कृत्वा लिखत । (२)

पूर्णवाक्यं अपेक्षितम् । ( प्रश्नं उत्तरं च) प्रत्येकं एक: गुण: ।.

१) पेडणे भाग: - आ) गृहनिर्माण कलायां ख्यात: ।

२) उपायेन हि यच्छक्यं -अ) न तच्छक्यं पराक्रमै: ।

**(द्वितीयखण्डः – अपठितावबोधनम् – ०६ गुणाङ्काः)**

प्र.४ त) अधस्तनं गद्यखण्डं पठित्वा प्रदत्तान् प्रश्नान् सूचनानुसारेण संस्कृतभाषया उत्तरत । (३)

सूचनानुसारं पूर्णानि व्याकरणशुद्धानि च उत्तराणि आवश्यकानि । अपूर्णउत्तरस्य अर्ध: गुण: न्यून: करणीय: । प्रत्येकं एक: गुण:।

अ)एकवाक्येन उत्तरत ।

१)जना: मातरं प्रणम्य तस्या: सेवां कृत्वा च सुखम् अनुभवन्ति ।

२)जन्मभूमि: अस्मभ्यं नाना- विधानि अन्नानि फलानि च दत्वा पालयति ।

आ) जननी स्नेहेन अपालयत् ।

थ) अधोलिखितयो: परिच्छेदयो: एकस्य अनुवादं स्वभाषया लिखत । (३)

भाषाशुद्धता, सन्दर्भ: , प्रत्येकं शब्दस्य अनुवाद: व्याकरणशुद्धता च एतेषां विषये चिन्तनं कृत्वा गुणा: देया: ।

**( तृतीयखण्डः – व्याकरणम् – १० गुणाङ्काः )**

प्र. ५ प) अधोलिखितवाक्यानां रिक्तस्थानेषु उचितानि पदरूपाणि कोष्टकात् चित्वा लिखत । (एकम्) (१)

कस्यचित् एकस्य वाक्यस्य कोष्ठकात् उचित-विभक्तिरूपं पूरयित्वा पूर्णवाक्यस्य लेखनम् अपेक्षितम् । प्रत्येकं एक: गुण: ।

अ) भक्ता: <u>श्रद्धया</u> देवालये गच्छन्ति ।

आ) जननी शिशुं <u>संकटात्</u> रक्षति ।

docs.aglasem.com



aglasem.com

फ) संस्कृतपर्यायपदं लिखत । (२)

उचितसंस्कृतपर्यायपदस्य लेखनम् अपेक्षितम् । प्रत्येकं एक: गुण: ।

अ) बुद्धि: - प्रज्ञा,मति:

आ) पर्वत: - नग:, गिरि:

ब) सन्धिं कृत्वा लिखत । (एकस्य) (१)

सन्धिं कृत्वा लेखनम् अपेक्षितम् । प्रत्येकं एक: गुण: ।

अ) प्रभावादस्य

आ) प्रशान्तस्तदा

भ) सूचनानुसारं अव्ययं लिखत । (१)

सूचनानुसारं क्त्वा-प्रत्ययान्तम् अव्ययलेखनम् अपेक्षितम् । प्रत्येकं एक: गुण: ।

अ) दृष्ट्वा

आ) मिलित्वा

प्र. ६ य) तालिकायां रिक्तस्थानेषु समस्तपदम्/ विग्रहम्/ समासनाम वा लिखत । ( द्वयो:) (२)

तालिकायां रिक्तस्थानेषु रिक्तभागं पूरयित्वा पुन: अन्यभागद्वयलेखनम् अपेक्षितम् । केचन द्वे उत्तरे अपेक्षिते । प्रत्येकं एक: गुण: ।

अ) अव्ययीभाव समास:

आ) मासचतुष्टयम्

इ) पाण्डवा: च कौरवा: च

र) रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं कृत्वा वाक्यं पुन: लिखत । (एकस्य) (१)

अ) माता सायङ्काले कुत्र गमिष्यति ?

आ) सा केषां संवर्धनं करोति?

ल)सूचनानुसारं वाक्यपरिवर्तनं कृत्वा वाक्यं पुन: लिखत। ( द्वयो:) (२)

कयोश्चित् द्वयो: वाक्ययो: सूचनानुसारं लेखनम् अपेक्षितम् । प्रत्येकं पूर्णलिखिताय उत्तरसहिताय वाक्याय एक: गुण: ।

अ) कार्यक्रमस्य आरम्भः सपादत्रिवादने: भविष्यति ।

आ) अहम् अग्निप्रवेशं अकरवम् ।

इ) स: महापङ्कात् बहि: गन्तुम् असमर्थ: अभवत् ।

ई) स्मारकाणि शोभन्ते ।

docs.aglasem.com



aglasem.com

**( चतुर्थखण्डः – रचना -०८ गुणाङ्काः )**

प्र. ७ व) कोष्टकात् उचितपदानि चित्वा त्रीणि सार्थकवाक्यानि लिखत। (३)

कोष्ठकात् उचितानि पदानि चित्वा कानिचन त्रीणि व्यवहारकाणि व्याकरणशुद्धानि च वाक्यानि अपेक्षितानि | प्रत्येकं एक: गुण: ।

अ) कमलानि सरोवरे विकसन्ति ।

आ) वयम् श्लोकान् पठाम: ।

इ) सज्जन: सन्मार्गम् अनुसरति ।

ई) बाला: कन्दुकेन क्रीडन्ति ।

श) कोष्टकात् उचितपदानि चित्वा संवादपूर्तिं कृत्वा लिखत । (३)

कोष्टकात् दत्तपदानां साहाय्येन संवादपूर्ति: अपेक्षिता ।संवादस्य पूर्ण लेखनम् अपेक्षितम् । प्रत्येकं योग्याय उत्तराय अर्ध: गुण: देय: । आहत्य त्रय: गुणा: ।

अञ्जनी- सखि ! पश्यतु भो: , तत्र किमपि पतितम् अस्ति ।
श्रेया- किं तत्र ?
अञ्जनी- पश्याम, आगच्छतु ।
श्रेया- अहो धनस्यूत: ।
अञ्जनी- एष: कस्य धनस्यूत: स्यात् ?
श्रेया- क: जानाति ?
अञ्जनी- स्यूते किम् अस्ति इति पश्यतु भो: ।
श्रेया- हन्त ! बहु धनम् अस्ति भो: । पश्यतु ।
अञ्जनी – सत्यम् । कति रुप्यकाणि सन्ति ?

ष) एकं विषयं अधिकृत्य संस्कृतभाषया व्याकरणशुद्धानि चत्वारि वाक्यानि लिखत । (२)

कमपि एकं विषयम् आधृत्य चत्वारि व्याकरणशुद्धानि संस्कृतवाक्यानि अपेक्षितानि । विषयवर्णनानुसारं गुणा: देया: । प्रत्येकं उचितवाक्याय अर्ध: गुण: ।

**अथवा**

ष) चित्रम् आधृत्य कोष्ठकस्थपदानां साहाय्येन व्याकरणशुद्धानि चत्वारि वाक्यानि लिखत । (२)

कोष्ठके दत्तपदानां अथवा स्वपदानां उपयोगं कृत्वा व्याकरणशुद्धानि चित्राधारितानि च चत्वारिवाक्यानि अपेक्षितानि । विषयवर्णनानुसारं गुणा: देया: ।प्रत्येकं उचितवाक्याय अर्ध: गुण: ।

==================================================

docs.aglasem.com



aglasem.com

## SYLLABUS FOR I TERM EXAM 2022-2023

## SUBJECT - SANSKRIT (T.L)

| प्रथमसत्रपाठ्यक्रमः २०२२-२०२३ | |
|---|---|
| विषयः – संस्कृतम् (तृ.भा) कक्षा – दशमी गुणाः- ४० | |
| **गद्यखण्डः** | सुविचार्य विधातव्यम्<br>चन्द्रनाथपर्वतः<br>अहं माण्डवी<br>त्रिवर्णः ध्वजः |
| **पद्यखण्डः** | सुभाषितानि<br>काव्यशास्त्रविनोदः |
| **व्याकरणम्** | लकाराः - लट्,लङ्,लृट्<br>शब्दरूपाणि – देव,मुनि,माला, नदी,वन,मातृ,पितृ,पयस्, सरित्, भगवत्<br>सर्वनामरूपाणि – तत्,एतत्,अस्मद्,युष्मद्,सर्व,इदम्<br>धातुरूपाणि – या,दा, पा, कृ इत्यादीनि<br>कारकविभक्तयः<br>उपपदविभक्तयः<br>वाक्यपरिवर्तनम्<br>प्रश्ननिर्माणम्<br>पर्यायपदलेखनम् / विलोमपदलेखनम्<br>सङ्ख्याविशेषणानि<br>सन्धिः<br>समसाः ( विभक्तितत्पुरुषः,<br>कर्मधारयः,द्विगुः,द्वन्द्वः,बहुव्रीहिः,अव्ययीभावः,उपपदतत्पुरुषः,नञ्तत्पुरुषः<br>अव्ययपदानि- क्त्वान्त,तुमन्त,ल्यबन्त<br>वाक्यशुद्धिः<br>स्म अव्ययं योजयत/ निष्कासयत \| |
| **रचना** | सार्थकवाक्यनिर्माणम्<br>कथापूर्तिः<br>संवादपूर्तिः<br>चित्रवर्णनम्<br>घटनाक्रमः<br>निबन्धलेखनम् |

docs.aglasem.com
aglasem.com

SYLLABUS FOR II TERM EXAM 2022-2023

SUBJECT - SANSKRIT (T.L)

| द्वितीयसत्रपरीक्षापाठ्यक्रमः २०२२-२०२३ | |
|---|---|
| विषयः – संस्कृतम्(तृ.भा) कक्षा – दशमी गुणाः- ४० | |
| **गद्यखण्डः** | प्रतिज्ञापूर्तिः<br>गोमन्तभूषणम्- श्रीमान् भाऊसाहेब बान्दोडकरः<br>उपायेन सर्वं शक्यम्<br>गोमन्तकीयं लोकजीवनम् |
| **पद्यखण्डः** | नीतिश्लोकाः<br>वाचनप्रशंसा |
| **व्याकरणम्** | लट्,लङ्,लृट्, लकाराः<br>शब्दरूपाणि – देव,मुनि,माला,नदी,वन,मातृ,पितृ,शशिन्,सरित्,पयस्,भगवत्,राजन् इत्यादीनि<br>सर्वनामरूपाणि – तत्,एतत्,अस्मद्,युष्मद्,सर्व,इदम् इत्यादीनि<br>धातुरूपाणि – रम्,लभ्,शोभ्,राज्, या,दा, पा, कृ इत्यादीनि इत्यादीनि<br>कारकविभक्तयः<br>उपपदविभक्तयः<br>वाक्यपरिवर्तनम्<br>प्रश्ननिर्माणम्<br>पर्यायपदलेखनम् / विलोमपदलेखनम्<br>सङ्ख्याविशेषणानि<br>क्रमवाचकसङ्ख्याः<br>समयः<br>सन्धिः<br>समसाः<br>(विभक्तितत्पुरुषः,कर्मधारयः,द्विगुः,द्वन्द्वः,बहुव्रीहिः,अव्ययीभावः,उपपदतत्पुरुषः,नञ्तत्पुरुषः)<br>अव्ययपदानि- क्त्वान्त,तुमन्त,ल्यबन्त<br>वाक्यशुद्धिः<br>स्म अव्ययं योजयत/ निष्कासयत \| |
| **रचना** | सार्थकवाक्यनिर्माणम्<br>कथापूर्तिः<br>संवादपूर्तिः<br>चित्रवर्णनम्<br>घटनाक्रमः<br>निबन्धलेखनम् |

docs.aglasem.com

aglasem.com

PORTION DISTRBUTION

SUBJECT - SANSKRIT (T.L)

**प्रथमा परीक्षा**

**विषयः – संस्कृतम् (तृ.भा) कक्षा-दशमी गुणा -२०**

**प्रथमखण्डः – पठितावबोधनम् -०८ गुणाः**

गद्यखण्डः – १.सुविचार्य विधातव्यम् २.चन्द्रनाथपर्वतः

पद्यखण्डः – १. सुभाषितानि

**द्वितीयखण्डः – अपठितावबोधनम् - ०३ गुणाः**

पद्यखण्डाधारितप्रश्नोत्तराणि

**तृतीयखण्डः – व्याकरणम् -०५ गुणाः**

व्याकरणम् – रिक्तस्थानपूर्तिः (१), सन्धिः (१), समासः (१),
प्रश्ननिर्माणम् (१)अव्ययम् लिखत – क्त्वा,तुमुन्,ल्यप् (१)

**चतुर्थखण्डः – रचना -०४ गुणाः**

घटनाक्रमः (२), कथापूर्तिः/ संवादपूर्तिः (२)

**द्वितीया परीक्षा**

**विषयः – संस्कृतम् (तृ.भा) कक्षा-दशमी गुणा -२०**

**प्रथमखण्डः – पठितावबोधनम् -०८ गुणाः**

गद्यखण्डः – १.अहं माण्डवी २.त्रिवर्णः ध्वजः

पद्यखण्डः – १. काव्यशास्त्रविनोदः

**द्वितीयखण्डः – अपठितावबोधनम् - ०३ गुणाः**

गद्यखण्डस्य अनुवादः

**तृतीयखण्डः – व्याकरणम् - ०५ गुणाः**

व्याकरणम् – रिक्तस्थानपूर्तिः (१), सन्धिः (१), समासः (१), प्रश्ननिर्माणम् (१)
सूचनानुसारं वाक्यपरिवर्तनम् (१)

**चतुर्थखण्डः – रचना -०४ गुणाः**

तालिकाशब्दैः वाक्यनिर्माणम् (२), निबन्धलेखनम्/ चित्रवर्णनम् (२)

docs.aglasem.com

aglasem.com

**प्रथमसत्रान्तपरीक्षापाठ्यक्रमः**

**विषयः – संस्कृतम् (तृ.भा) कक्षा-दशमी गुणा -४०**

**प्रथमखण्डः – पठितावबोधनम् -१६ गुणाः**

गद्यखण्डः – १.सुविचार्य विधातव्यम् २. चन्द्रनाथपर्वतः ३.अहं माण्डवी
४.त्रिवर्णः ध्वजः

पद्यखण्डः – १.सुभाषितानि २.काव्यशास्त्रविनोदः

**द्वितीयखण्डः – अपठितावबोधनम् - ०६ गुणाः**

परिच्छेदप्रश्नोत्तराणि (३), गद्यखण्डस्य अनुवादः (०३)

**तृतीयखण्डः – व्याकरणम् -१८ गुणाः**

व्याकरणम् – रिक्तस्थानपूर्तिः (३), सन्धिः (२), समासः (३), प्रश्ननिर्माणम् (२)
पर्यायपदानि (३), विलोमपदानि (३), अव्ययम् लिखत – क्त्वा,तुमुन्,ल्यप् (२)

**तृतीया परीक्षा- २० गुणाः**

**Suggested Topics For The Innovative Projects**

**उपक्रमः (Assignment)**

१)सुभाषितलेखनम् |

२)कवि,मति,नदी,वारि एतेषु शब्देषु द्वयोः विभक्तिरूपाणां लेखनम् |

३)पाठान् अनुसृत्य सन्धिलेखनम् |

४)त्रीन् धातून् गृहीत्वा लट् तथा लङ् लकारस्य क्रियापदरूपलेखनम् |

**प्रकल्पः (Project)**

१)षड् पठितसुभाषितानां ध्वनिमुद्रणम् |

२)एकस्य पठितपाठस्य ध्वनिमुद्रणम् |

३)संस्कृतस्वपरिचयस्य चलच्चित्रणम् |( Video)

४)संस्कृत लघुकथायाः चलच्चित्रणम् |( Video)

५)दशवाक्यानां संस्कृतसम्भाषणस्य चलच्चित्रणम् |( Video)

docs.aglasem.com

aglasem.com

**अन्तिमा परीक्षा**

**विषयः – संस्कृतम् (तृ.भा) कक्षा-दशमी गुणा -४०**

**प्रथमखण्डः – पठितावबोधनम् -१६ गुणाः**

गद्यखण्डः- १. प्रतिज्ञापूर्तिः, २. गोमन्तभूषणं श्रीमान् भाऊसाहेब बान्दोडकरः|

३.उपायेन हि शक्यम् | ४.गोमन्तकीयं लोकजीवनम् |

पद्यखण्डः – १.नीतिश्लोकाः २.वाचप्रशंसा

**द्वितीयखण्डः – अपठितावबोधनम् - ०६ गुणाः**

परिच्छेदप्रश्नोत्तराणि (३), गद्यखण्डस्य अनुवादः (०३)

**तृतीयखण्डः – व्याकरणम् -१० गुणाः**

व्याकरणम् – रिक्तस्थानपूर्तिः (१), सन्धिः (१), समासः (२), प्रश्ननिर्माणम् (१)

पर्यायपदानि / विलोमपदानि (२), सूचनानुसारं लिखत (२)

अव्ययम् लिखत – क्त्वा,तुमुन्,ल्यप् (१)

**चतुर्थखण्डः –रचना- ०८ गुणाः**

तालिकाशब्दैः सार्थकवाक्यलेखनम् (३)

कथापूर्थिः / संवादपूर्तिः (३)

चित्रवर्णनम् / निबन्धलेखनम् (२)

==================================================

docs.aglasem.com

aglasem.com